श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ अष्टादशाधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टादशाधिकशततमः सर्गः ॥

## चितां विधूय सीतामादाय मूर्तिमतोऽग्निदेवस्य प्रकटनं सीतां श्रीरामाय समर्प्य तस्याः पवित्रतायाः प्रमाणीकरणं श्रीरामेण सहर्षं सीतायाः स्वीकरणं च

एतच्छ्रुत्वा शुभं वाक्यं पितामहसमीरितम्।
अङ्केनादाय वैदेहीमुत्पपात विभावसुः ॥ **6.118.1** ॥

विधूयाथ चितां तां तु वैदेहीं हव्यवाहनः।
उत्तस्थौ मूर्तिमानाशु गृहीत्वा जनकात्मजाम् ॥ **6.118.2** ॥

तरुणादित्यसङ्काशां तप्तकाञ्चनभूषणाम्।
रक्ताम्बरधरां बालां नीलकुञ्चितमूर्धजाम् ॥ **6.118.3** ॥

अक्लिष्टमाल्याभरणां तथारूपामनिन्दिताम्।
ददौ रामाय वैदेहीमङ्के कृत्वा विभावसुः ॥ **6.118.4** ॥

अब्रवीत् तु तदा रामं साक्षी लोकस्य पावकः।
एषा ते राम वैदेही पापमस्यां न विद्यते ॥ **6.118.5** ॥

नैव वाचा न मनसा नैव बुद्ध्या न चक्षुषा।
सुवृत्ता वृत्तशौटीर्यं न त्वामत्यचरच्छुभा ॥ **6.118.6** ॥

रावणेनापनीतैषा वीर्योत्सिक्तेन रक्षसा।
त्वया विरहिता दीना विवशा निर्जने सती ॥ **6.118.7** ॥

रुद्धा चान्तःपुरे गुप्ता त्वच्चित्ता त्वत्परायणा।
रक्षिता राक्षसीभिश्च घोराभिर्घोरबुद्धिभिः ॥ **6.118.8** ॥

प्रलोभ्यमाना विविधं तर्ज्यमाना च मैथिली।
नाचिन्तयत तद्रक्षस्त्वद्गतेनान्तरात्मना ॥ **6.118.9** ॥

विशुद्धभावां निष्पापां प्रतिगृह्णीष्व मैथिलीम्।
न किञ्चिदभिधातव्या अहमाज्ञापयामि ते ॥ **6.118.10** ॥

ततः प्रीतमना रामः श्रुत्वैवं वदतां वरः।
दध्यौ मुहूर्तं धर्मात्मा हर्षव्याकुललोचनः ॥ **6.118.11** ॥

एवमुक्तो महातेजा धृतिमानुरुविक्रमः।
उवाच त्रिदशश्रेष्ठं रामो धर्मभृतां वरः ॥ **6.118.12** ॥

अवश्यं चापि लोकेषु सीता पावनमर्हति।
दीर्घकालोषिता हीयं रावणान्तःपुरे शुभा ॥ **6.118.13** ॥

बालिशो बत कामात्मा रामो दशरथात्मजः।
इति वक्ष्यति मां लोको जानकीमविशोध्य हि ॥ **6.118.14** ॥

अनन्यहृदयां सीतां मच्चित्तपरिरक्षिणीम्।
अहमप्यवगच्छामि मैथिलीं जनकात्मजाम् ॥ **6.118.15** ॥

इमामपि विशालाक्षीं रक्षितां स्वेन तेजसा।
रावणो नातिवर्तेत वेलामिव महोदधिः ॥ **6.118.16** ॥

प्रत्ययार्थं तु लोकानां त्रयाणां सत्यसंश्रयः।
उपेक्षे चापि वैदेहीं प्रविशन्तीं हुताशनम् ॥ **6.118.17** ॥

न हि शक्तः सुदुष्टात्मा मनसापि हि मैथिलीम्।
प्रधर्षयितुमप्राप्यां दीप्तामग्निशिखामिव ॥ **6.118.18** ॥

**नेयमर्हति वैक्लव्यं रावणान्तःपुरे सती।**
**अनन्या हि मया सीता भास्करस्य प्रभा यथा॥ 6.118.19॥**

**विशुद्धा त्रिषु लोकेषु मैथिली जनकात्मजा।**
**न विहातुं मया शक्या कीर्तिरात्मवता यथा॥ 6.118.20॥**

**अवश्यं च मया कार्यं सर्वेषां वो वचो हितम्।**
**स्निग्धानां लोकनाथानामेवं च वदतां हितम्॥ 6.118.21॥**

**इत्येवमुक्त्वा विजयी महाबलः**
**प्रशस्यमानः स्वकृतेन कर्मणा।**
**समेत्य रामः प्रियया महायशाः**
**सुखं सुखार्होऽनुबभूव राघवः॥ 6.118.22॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
अष्टादशाधिकशततमः सर्गः॥